# Brahmaproktam Vishnu Stotram

# ब्रह्मप्रोक्तं विष्णुस्तोत्रम्

## Document Information

Text title : Brahmaproktam Vishnu Stotram

File name : brahmaproktaMviShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | bhIShmaparva | adhyAya 62/13-23||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ब्रह्मप्रोक्तं विष्णुस्तोत्रम्

अजेयौ समरे यत्तौ सहितावमरैरपि ।
मूढास्त्वेतौ न जानन्ति नरनारायणावृषी ॥ १२॥

तस्याहमात्मजो ब्रह्मा सर्वस्य जगतः पतिः ।
वासुदेवोऽर्चनीयो वः सर्वलोकमहेश्वरः ॥ १३॥

तथा मनुष्योऽयमिति कदाचित्सुरसत्तमाः ।
नावज्ञेयो महावीर्यः शङ्खचक्रगदाधरः ॥ १४॥

एतत्परमकं गुह्यमेतत्परमकं पदम् ।
एतत्परमकं ब्रह्म एतत्परमकं यशः ॥ १५॥

एतदक्षरमव्यक्तमेतत्तच्छाश्वतं महत् ।
एतत्पुरुषसंज्ञं वै गीयते ज्ञायते न च ॥ १६॥

एतत्परमकं तेज एतत्परमकं सुखम् ।
एतत्परमकं सत्यं कीर्तितं विश्वकर्मणा ॥ १७॥

तस्मात्सर्वैः सुरैः सेन्द्रैर्लोकैश्चामितविक्रमः ।
नावज्ञेयो वासुदेवो मानुषोऽयमिति प्रभुः ॥ १८॥

यश्च मानुषमात्रोऽयमिति ब्रूयात्सुमन्दधीः ।
हृषीकेशमवज्ञानात्तमाहुः पुरुषाधमम् ॥ १९॥

योगिनं तं महात्मानं प्रविष्टं मानुषीं तनुम् ।
अवमन्येद्वासुदेवं तमाहुस्तामसं जनाः ॥ २०॥

देवं चराचरात्मानं श्रीवत्साङ्कं सुवर्चसम् ।
पद्मनाभं न जानाति तमाहुस्तामसं जनाः ॥ २१॥

किरीटकौस्तुभधरं मित्राणामभयङ्करम् ।
अवजानन्महात्मानं घोरे तमसि मज्जति ॥ २२॥

एवं विदित्वा तत्त्वार्थं लोकानामीश्वरेश्वरः ।
वासुदेवो नमस्कार्यः सर्वलोकैः सुरोत्तमाः ॥ २३॥

इति महाभारते भीष्मपर्वणि ६२ अध्यायान्तर्गतं
ब्रह्मप्रोक्तं विष्णुस्तोत्रं सम्पूर्णम् ।

महाभारत । भीष्मपर्व । अध्याय ६२/१३-२३॥

mahAbhArata . bhIShmaparva . adhyAya 62/13-23..

Proofread by PSA Easwaran

*Brahmaproktam Vishnu Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*